**PAPER CODE - MANYC403**

**PAPER NAME -व्याप्तिविमर्शः - 4**

**Unit - 1**

**लघूत्तरीयप्रश्नाः (1×12)**

1. सिद्धान्तलक्षणस्य रचयिता कः?

2. 'सिद्धान्तलक्षणम्' कस्य ग्रन्थस्य टीका अस्ति?

3.व्याप्तेः सामान्यलक्षणं किम्?

4.जागदीशीमते व्याप्तिः कतिविधा?

5.'लक्षणम्' इति पदस्य कोऽर्थः?

6.अव्याप्तिः का भवति?

7.अतिव्याप्तिः का?

8.असम्भवः कः?

9.प्रतियोगिता कस्य भवति?

10.सिद्धान्तलक्षणे कस्य अभावस्य चर्चा मुख्यतया कृता?

**टिप्पणी - (6×7)**

1. तत्त्वचिन्तामणिः

2. गङ्गेशोपाध्यायः

3. दीधितिकारः

4. सिद्धान्तलक्षणम्

5. जगदीशभट्टाचार्यः

6.असमानाधिकरणान्तदलप्रयोजनम्

7. उपाधिविचारः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. अत्यन्तपदोपादानप्रयोजनं प्रतिपादयत।

2. संसर्गाभावप्रवेशविचारं निरूपयत।

3. प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणत्वविचारं विवेचनीयम्।

4.प्रतियोगितावच्छेदकावच्छिन्नाधिकरणस्वरूपविचारं प्रकाशयत।

5. हेत्वधिकरणस्य साध्याधिकरणस्य च संसर्गविचारं विवेचयत।

6. धर्मिणोः व्याप्यव्यापकभावविचारं प्रतिपादयत।

## Unit - 2

**लघूत्तरीयप्रश्नाः (1×12)**

1. को नाम अत्यन्ताभावः?

2. प्राचीनमते ध्वंसाधिकरणे अत्यन्ताभावः तिष्ठति न वा?

3. नव्यमते ध्वंसाधिकरणे अत्यन्ताभावः तिष्ठति न वा?

4. नव्यमते प्रागाभावाधिकरणे अत्यन्ताभावः तिष्ठति न वा ?

5. प्राचीनमते प्रागाभावाधिकरणे अत्यन्ताभावः तिष्ठति न वा ?

6.अन्वयव्याप्तिः का?

7.व्यतिरेकव्याप्तिः का?

8.उपाधिः कः?

9.सपक्षः कः?

10.विपक्षः कः?

11.पक्षः कः?

12.हेतुः कः?

**टिप्पणी - (6×7)**

1.द्रव्ये संयोगसामान्याभावे मानाभावात्2. अत्यन्ताभावनिरूपकत्वम्

3.व्याप्यवृत्तित्वम्

4. ज्ञानवान् द्रव्यत्त्वात् इत्यत्र दोषवारणम्

5. प्रतियोग्यधिकरणविचारः

6. मूर्तमात्रस्य दिगुपाधित्वम्

7. अन्योन्याभावः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.महाकालत्वहेतुकाव्याप्त्युद्भावनं व्यवस्थापयत।

2. सार्वभौमाभिमतव्याप्तिलक्षणं विवृणोत।

3. सम्बन्धधर्मिकोभयाभावघटितलक्षणं निरूपयत।

4. प्रतियोगिताधर्मिकोभयाभावघटितलक्षणं निरूपयत।

5. सिद्धान्तलक्षणस्य अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिं प्रदर्श्य निवारयत।

6. प्रतियोग्यसामानाधिकरण्यदलस्य

प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यार्थकरणे प्रयोजनं स्पष्टयत।

## Unit - 3

**लघूत्तरीयप्रश्नाः (1×13)**

1.परामर्शः कः?

2.अनुमितिः का?

3.किन्नाम प्रतियोगितावच्छेदकत्वम्?

4.केवलान्वयी हेतुः कः?

5.केवलव्यतिरेकी हेतुः कः?

6.अन्वयव्यतिरेकी हेतुः कः?

7.व्याप्तिज्ञानस्य प्रतिबन्धकं किम्?

8.प्रतियोग्यसमानाधिकरणाभावः कः?

9.अवच्छेदकता कतिविधा?

10.जगदीशतर्कालङ्कारः कस्य देशस्य निवासी आसीत्?

11.स्वार्थानुमितिः का?

12.परार्थानुमितिः का?

13.को नाम संशयः?

**टिप्पणी - (6×8)**

1. तद्ववृत्तिभिन्नत्वम् तु नार्थः।

2. एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां भेदेऽप्यैक्यम्।

3. विशिष्टं शुद्धान्नातिरिच्यते।

4. उभयत्वपदार्थः।

5. विशिष्टबुद्धिः।

6. सार्वभौमः।

7. संयोगाभावे गुणे न संयोगसामानाधिकरण्यम्।

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1."न चोभयत्वमेकविशिष्टापरत्वं, विशिष्टञ्च केवलादन्यदिति" दीधितिग्रन्थस्याशयं स्पष्टीकुरुत ।

2. अत्यन्तपदस्य वैय्यर्थ्यं प्रतिपादयत।

3."इयांस्तु विशेषो, यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति" दीधितिकारस्य भावार्थः निरूपयत।

4.वक्ष्यते च नियमाघटितमेव संसर्गाभावादिलक्षणम् - इति पतेराशयं प्रकाशयत।

5. प्रतियोगितावच्छेदकसम्बन्धेन

प्रतियोग्यधिकरणत्वविचारं यथाग्रन्थं प्रतिपादयत।

6. सिद्धान्तलक्षणे प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् अनधिकरणमित्युक्ते दोषोद्भावनं कुरुत।

## Unit - 4

**लघूत्तरीयप्रश्नाः (1×13)**

1. सिद्धान्तलक्षणघटकं प्रथमं 'यत्' पदं किमर्थकम् ?

2. सिद्धान्तलक्षणघटकं द्वितीय 'यत्' पदस्य कोऽर्थः?

3. सिद्धान्तलक्षणघटकं प्रथमं 'तत्' पद किमर्थकम् ?

4. सिद्धान्तलक्षणघटकं द्वितीय 'तत्' पदस्य कोऽर्थः?

5. किं नाम साध्यतावच्छेदकरत्त्वम्?

6. प्रमेयाश्रयवान् धूमात् इत्यत्र साध्यतावच्छेदकं किम्?

7. दण्डिमान् दण्डिसंयोगात् इत्यत्र परम्परासम्बन्धेन साध्यतावच्छेदकं किम्?

8. इदं द्रव्यं गुणकर्माण्यत्वे सति सत्त्वादित्यत्र हेतुः कः?

9. यद्रूपविशिष्टस्य फलं किम् ?

10. किं नाम अव्याप्तिवृत्तित्वम्?

11. सामानाधिकरण्यव्यक्तिनां भेदेभि व्याप्तेः ऐक्यं कथम्?

12. एकम् अव्याप्त्यवृत्तिसाध्यकम् उदाहरत।

13. दीधितिकारमते द्रव्ये संयोगसामान्याभाव भवति न वा?

14. यो यदीय यावद्विशेषाभाववान्…..?

**टिप्पणी - (6×8)**

1. मूर्तमात्रं कालोपाधिः

2. हेत्वधिकरणस्य संसर्गविचारः

3. साध्याधिकरणस्य संसर्गविचार

4. परामर्शः

5. धर्मिणोः व्याप्य-व्यापकभावविचारः

6. पक्षधर्मता

7. गोत्वत्वपदार्थः

8. वृत्तिनियामकसंसर्गविचारः

9. वृत्त्यनियामकसंसर्गविचारः

**दीर्घोत्तरीयप्रश्नाः (10×7)**

1. सिद्धान्तलक्षणे प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य अनधिकरणमित्युक्ते को दोषः इति स्पष्टयत।

2. सिद्धान्तलक्षणे प्रतियोगितावच्छेदक

यत्किञ्चिदवच्छिन्नस्य अनधिकरणमित्युक्ते दोषमुद्भाव्य निराकुरुत।

3. हेत्वधिकरणस्य साध्याधिकरणस्य च संसर्गविचारं यथाग्रन्थम् उपस्थापयत।

4. कालो घटवान् महाकालत्त्वादित्यत्र अव्याप्तिमुद्भाव्य निराकुरुत।

5. सार्वभौमाभिमतं व्याप्तिलक्षणं परिष्कुरुत।

6. न्यायशास्त्रीयपरम्परायां सिद्धान्तलक्षणग्रन्थस्य महत्त्वं निरूपयत।

7. न्यायशास्त्रीयाचार्यपरम्परायां जगदीशभट्टाचार्यस्य अवदानं चर्चयत।

**PAPER CODE – MANYC401**

**PAPER NAME – न्यायकुसुमाञ्जलिः -2**

**Unit 1**

**लघूत्तरीयप्रश्नाः (1×12)**

1.न्यायकुसुमाञ्जलिकारः कः?

2.न्यायकुसुमाञ्जलौ कति स्तवका: सन्ति?

3.न्यायकुसुमाञ्जलौ कति विप्रतिपत्तयः सन्ति?

4.न्यायकुसुमाञ्जलौ तृतीयविप्रतिपत्ति : का?

5.न्यायकुसुमाञ्जलौ चतुर्थविप्रतिपत्ति: का?

6.न्यायकुसुमाञ्जलौ पञ्चमविप्रतिपत्ति: का?

7. ‘तदभावावेदकप्रमाणसद्भावात् ‘ इतिविप्रतिपत्ति : कस्य?

8. पञ्चतयी विप्रतिपत्तिसु बौद्धानां विप्रतिपत्ति: का?

9. का नाम अनुपलब्धि:?

10. अनुपलब्धिप्रमाणेन ईश्वराभावं के साधयन्ति?

11. किं नाम कर्तृत्त्वम्?

12. का नाम पक्षाऽसिद्धि :?

**टिप्पणी – (6×7)**

1.शब्दस्यानुवादकत्वं निवारयति।

2. ज्ञातताखण्डनम।

3. वैशेषिकमतेन  उपमानप्रमाणस्य खण्डनम।

4. शब्दस्य ईश्वरबाधकत्वनिराकरणम।

5. ईश्वरस्य प्रमाणत्वं तज्ज्ञानस्य प्रमात्वसाधनञ्च।

6. अर्थापत्ति: ईश्वरबाधकत्वनिराकरणम।

7.  आख्यातार्थविचारः।

8.  विधिप्रत्ययार्थविचारः।

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.अनुपलब्धे: ईश्वराभावसाधकत्वं निवारयत।

2. अनुमानस्य ईश्वरबाधकत्वं खण्डयत।

3. उपमानस्य प्रमणान्तरत्वं व्यवस्थापयत।

4. आत्मनि क्षित्यादिकर्त्तृत्वाभावः दृष्टापत्तिरूप इति सिद्धान्तमिमं संप्रदर्शयत।

5. व्याप्तिग्रहे शङ्कासम्भवाद् अनुमानविलोप इति पूर्वपक्षं निवारयत।

6. उपमानप्रमाणस्य ईश्वरबाधकत्वं निराकुरुत।

7. वैशेषिकमतेन उपमाणप्रमाणस्य खण्डनं प्रदर्शयत।

## Unit 2

**लघूत्तरीयप्रश्नाः (1×12)**

1. का नाम प्रतियोगिता?

2. का नाम हेत्वसिद्धि :?

3. को नाम आगमः?

4. को नाम सन्देहः?

5. का नाम व्यभिचारशंका?

6. पक्ष: कः?

7. सपक्ष कः?

8. विपक्ष : कः?

9. को नाम उपाधि :?

10. सादृश्यं नाम किम्?

11. केचन् सादृश्यस्य पदार्थान्तरत्वं केन प्रमाणेन साधयन्ति?

12. किं नाम प्रतियोगित्वम्?

**टिप्पणी – (6×7)**

1. इष्टसिद्धिः प्रसिद्धेऽशे हेत्वसिद्धिरगोचरे ।

   नान्या सामान्यतः सिद्धिर्जातावपि तथैव सा ॥

2. आगमादेः प्रमाणत्वे बाधनादनिषेधनम्।

   आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥

3. शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम् ।

व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥

4. सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह ।

प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥

5. अनैकान्तः परिच्छेदे सम्भवे च न निर्णयः ।

अकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना ॥

6. न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता ।

अदृश्यदृष्टी सर्वज्ञो न च नित्यागमः क्षमः ॥

7. हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ।

तदभावात् प्रवृत्तिर्न कर्मवादेप्ययं विधिः ॥

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. संज्ञासंज्ञिसम्बन्धस्य उपमानविषयस्य शब्देन अनुमानेन वा न ग्रहणमिति दर्शयत।

2. उपमानविषयस्य संज्ञासंज्ञिसम्बन्धरूपशब्देन अनुमानेन वा ग्रहणं न सम्भवतीति उपमानं मन्तव्यमेवेति दर्शयत।

3. न्यायकुसुमाञ्जलेः पञ्चं स्तबकानुसारम् ईश्वरसाधकानि अनुमानानि प्रदर्शयत्।

4. लौकिकस्यापि शब्दप्रामाण्यस्यानुवादकत्वं खण्डयत।

5. अर्थापत्तेः प्रमाणत्वं निराकुरूत।

6. उपलब्धेः प्रमाणान्तरत्वं खण्डयत।

**Unit 3**

**लघूत्तरीयप्रश्नाः (1×12)**

1. किं नाम साधर्म्यम् ?

2. किं नाम वैधर्म्यम्?

3. अबन्धना शब्दस्य कोऽर्थः?

4. प्रभाकरनये वेदस्य पौरुषेयत्वम् अपौरुषेयत्वम् वा?

5. को नाम सर्वज्ञः?

6. को नाम प्रमा?

7. तुरीयविप्रतिपत्ति: का?

8. ईश्वराभावसाधने जैनानां विप्रतिपत्ति: का?

9. किं नाम धारावाहिकज्ञानम्?

10. 'सत्त्वेऽपि तस्याप्रमाणत्वात् ' इति विप्रतिपत्ति: कस्य?

11. अनैकान्तिकत्वं नाम किम्?

12. सम्यक् परिक्षिथि: का?

13. न्यायसूत्रे ईश्वरस्य प्रामाण्यसाधनं सूत्रं किम्?

**टिप्पणी – (6×7)**

1. अप्राप्तेरधिकप्राप्तेरलक्षणमपूर्ववृक्।

यथार्थाऽनुभवो मानमनपेक्षतयेष्यते ।।

2. स्वभावनियमाभावादुपकारो हि दुर्घटः ।

सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ।।

3. अनैकान्तादसिद्धेर्वा न च लिङ्गमिह क्रिया ।

तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके ।।

4.	मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।

तदयोगव्यच्छेदः प्रामाण्यं गौतमे मते ॥

5.	न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः ।

सिद्ध्यसिद्धयोर्विरोधो न नासिद्धिरनिबन्धना ॥

6.	तर्काभासतयाऽन्येषां तर्काशुद्धिरदूषणम् ।

अनुकूलस्तु तकर्कोऽत्र कार्यलोपो विभूषणम् ॥

7.	स्वातन्त्र्ये जडताहानिः नादृष्टं दृष्टघातकम् ।

हेत्वभावे फलाभावः विशेषस्तु विशेषवान् ॥

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. ज्ञाततां विनैव कर्मणां भेदसाधनं कुरुत।

2. ईश्वरज्ञानस्य प्रमात्वं तत्प्रामाण्यसाधनं व्यवस्थापयत।

3. साक्षात्कारिणी नित्ययोगिनि परद्वारानपेक्षस्थितौ।

भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः॥

- कारिकामिमां विस्तरेण विमृशत।

4. कार्यत्वहेतौ पञ्चदोषान् निर्दिश्य तन्निराकुरुत।

5. ईश्वरबाधकं तर्कं निराकृत्य तत्साधकं तर्कं दर्शयत।

6. धृत्यादीनां हेतूनां प्रयत्नजन्यत्वे मानं प्रदर्शयत।

## Unit 4

**लघूत्तरीयप्रश्नाः (1×12)**

1. साक्षात्कारिणी प्रमा का?

2. को नाम अनुव्यवसाय:?

3. न्यायकुसुमाञ्जलौ साङ्ख्यानां विप्रतिपत्ति: का?

4. ‘तत्साधकप्रमाणाभावात् ‘ इति विप्रतिपत्ति: कस्य?

5. ईश्वरसाधनाय कुसुमाञ्जलिकारोक्त कारिकां लिखत?

6. ईश्वरसाधनाय आचार्येण कति हेतवः प्रतिपादिता?

7. आयोजनं नाम किम्?

8. का नाम धृति:?

9. ‘पदात् ‘इति पदस्य व्युत्पत्ति : काः?

10. प्रत्ययश: इति पदस्य कोऽर्थः?

11. का नाम श्रुति :?

12. वेदस्य पौरुषेयत्वसाधकम् अनुमानं किम्?

13.न्यायकुसुमाञ्जलौ द्वितीयविप्रतिपत्ति : का?

**टिप्पणी – (6×7)**

1. प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा।

तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽयवा॥

2. इष्टहाने-रनिष्टाप्ते-रप्रवृत्ते-र्विरोधतः।

असत्त्वात् प्रत्ययत्यागात् कर्तृधर्मो न सङ्करात्॥

3. आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना।

सङ्ख्येयमात्रलाभे तु साकाङ्क्षेण व्यवस्थितिः ॥

4. अतिप्रसङ्गान्न फलं नापूर्वं तत्त्वहानितः ।

तदलाभान्न कार्यञ्च न क्रियाप्यप्रवृत्तितः ॥

5. विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः ।

अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता ॥

6. स्यामभूवं भविष्यामीत्यादौ सङ्ख्या प्रवृत्तिगा।

समाख्याऽपि च शाखानां नाद्यप्रवचनादृते ॥

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1. यत्नस्य आख्यातार्थत्वं निरूपयत।

2. कर्तरि आख्यातशक्तिं खण्डयत।

3. कर्मनिष्ठस्य धर्मस्य विध्यर्थत्वं व्यवस्थापयत।

4. अविधायाः शाब्दभावनायाः विध्यर्थत्वं निरूपयत।

5. आप्ताभिप्रायस्य विध्यर्थत्वं निराकुरुत।

6. दार्शनिकवाङ्मये उदयनाचार्यस्य अवदानं निरूपयत।

**Paper code - MANYC402**

**Paper name -सामान्यनिरुक्तिः - 2**

**Unit 1**

**लघूत्तरीयप्रश्नाः (1×12)**

1.द्वितीयलक्षणे लिङ्गपदं विवक्षितम् अविवक्षितं वा?

2.'यद्विषयकत्वेन' इत्यत्र तृतीयार्थः कः?

3.विशिष्टं _________ नातिरिच्यते।

4.नातिरिक्तवृत्तित्वं नाम किम्?

5.दीधितिकारेण यद्विषयकत्वेन इत्यस्य कोऽर्थः प्रतिपादितः?

6.लक्षणघटकतत्वमित्यस्य कोऽर्थः?

7.सद्हेतुस्थले पक्षविशेष्यकभ्रमः कः?

8.विशिष्टं शुद्धात् ________________।

9.पक्षविशेषणकभ्रमः कः?

10.दुष्टत्वं नाम किम्?

**टिप्पणी – (6×7)**

1.प्रतिबन्धकत्वम्

2.पर्याप्तिः

3.अवच्छेदकत्वम्

4.गदाधरभट्टाचार्यः

5.तत्त्वचिन्तामणिः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.द्वितीयलक्षणं विलिख्य  तस्य कुत्रचित् लक्ष्ये समन्वयः विधेयः।

2.यद्विषयकत्वेन  इत्यत्र तृतीयार्थ-अवच्छेदकत्वस्य विचारः ग्रन्थदिशा प्रतिपादनीयः।

3.'जातिमान् वह्न्यभाववान्' इत्यादिस्थलेषु अतिव्याप्तिवारणप्रकारं प्रदर्शयत।

4.अव्यापकीभूतविषयताशून्यत्वघटकलक्षणं विलिख्य तस्य समन्वयः कथमिति विवेचयत।

5.विशिष्टद्वयघटितत्वघटितलक्षणं परिष्कुरूत।

## Unit 2

**लघूत्तरीयप्रश्नाः (1×12)**

1.भ्रमपदं किं परम्?

2.अवच्छेदकत्वं कतिविधम्?

3.दीधितिकारेण अवच्छेदकत्वस्य कोऽर्थः अङ्गीकृतः?

4.लक्षणघटकज्ञानस्येतिपदस्य कोऽर्थः अभिप्रेत?

5.ज्ञानस्येत्यत्र षष्ठ्यर्थः कः?

6.ह्रदो वह्निमान् धूमादितिस्थले 'जातिमान् वह्न्यभाववान्' इत्याकारकनिश्चयः प्रतिबन्धकः भवति न वा?

7.अव्यापकीभूतविषयताशून्यत्वघटितं लक्षणं किम्?

8.किं नाम आहार्यज्ञानम्?

9.अप्रामाण्यज्ञानास्कन्दितं ज्ञानं किम्?

10.विशिष्टद्वयाघटितं लक्षणं किम्?

**टिप्पणी – (6×7)**

1.रघुनाथशिरोमणिः

2.गङ्गेशोऽपाध्यायः

3.जगदीशभट्टाचार्यः

4.सामान्यनिरुक्तिः

5.उदयनाचार्यः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.अवच्छेदकत्वस्य अनतिरिक्तवृत्तित्वरूपत्वं व्यवस्थापयत।

2.लक्षणघटकज्ञानपदस्य परिष्कारः ग्रन्थदिशा विवेचनीयः।

3.जातिमान् जातिमान् इत्यादिस्थलेषु दोषवारणप्रकारं प्रदर्शयत।

4.'अवच्छेदकत्वं चेहाऽनतिरिक्तवृत्तित्वम्' इतिपङ्क्तेराशयं स्पष्टीकुरुत।

5.मेयत्वविशिष्टव्यभिचारादौ अतिव्याप्तिवारणप्रकारं विवेचयत।

## Unit 3

**लघूत्तरीयप्रश्नाः (1×12)**

1.किं नाम व्यापकत्वम्?

2.सामान्याधिकरण्यं नाम किम्?

3.तद्वत्ताबुद्धिं प्रति प्रतिबन्धकः कः?

4.'विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन' इत्युक्तिः कस्य?

5.मेयत्वविशिष्टव्यभिचारः दोषः अस्ति न वा?

6.गगनं घटवत् द्रव्यत्वात् इत्यत्र कः हेत्वाभासः?

7.द्वितीयलक्षणे 'तत्त्वं' इत्यस्य कः अर्थः?

8.व्याप्तिविशिष्टपक्षधर्मताज्ञानं किमुच्यते?

9.पर्वतो वह्निमान् काञ्चनमयधूमात् इत्यत्र कः दोषः?

10.बाधस्थले प्रतिबन्धकज्ञानस्य विषयः कः?

**टिप्पणी – (6×7)**

1.तृतीयार्थः

2.व्यापकत्वम्

3.अव्यापकत्वम्

4.मेयत्वविशिष्टव्यभिचारादीनां हेत्वाभासत्वखण्डनम्

5.जातिमान् वह्न्यभाववान् इत्यत्र अतिव्याप्तिनिराकरणम्

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.विशिष्टान्तराघटितत्वघटितलक्षणं परिष्कुरुत।

2.' विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वम्' इतिपङ्क्तेराशयं विशदयत।

3.'प्रमेयं गगनवद् वाच्यत्वात्' इत्यत्र अव्याप्तिं प्रदर्श्य निराकुरुत।

4.धूमव्यभिचारी वह्निमान् धूमवान् वह्नेः इत्यादौ अव्याप्तेः वारणप्रकारं प्रदर्शयत।

5.प्रथम नचकल्पोक्तं लक्षणं ससमन्वयं प्रदर्शयत।

## Unit 4

**लघूत्तरीयप्रश्नाः (1×12)**

1.द्वितीयलक्षणे यत्पदेन कस्य ग्रहणं भवति?

2.व्यभिचारज्ञानं कथं प्रतिबन्धकं भवति?

3.हेत्वाभासनिरूपणस्य मुख्यं प्रयोजनं किम्?

4.अनुमितिप्रतिबन्धकत्वं कस्य भवति?

5.बाधस्य लक्षणं संक्षेपेण लिखत।

6.किं संशयः प्रतिबन्धकः भवति?

7.द्वितीयलक्षणे अनुमितिपदेन किं गृह्यते?

8.विरुद्धहेत्वाभासस्य लक्षणं किम्?

9.सव्यभिचारस्य कतिभेदाः सन्ति?

10.प्रतिबन्धकता कतिविधा अस्ति?

**टिप्पणी – (6×7)**

1.सामान्याधिकरण्यम्

2.अप्रामाण्यस्कन्दितज्ञानम्

3.आहार्यज्ञानम्

4.सत्प्रतिपक्षः

5.सव्यभिचारः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.द्वितीय नचकल्पोक्तं लक्षणं ससमन्वयं प्रदर्शयत।

2.तृतीय नचकल्पोक्तं लक्षणं ससमन्वयं प्रदर्शयत।

3.चतुर्थ नचकल्पोक्तं लक्षणं ससमन्वयं प्रदर्शयत।

4.न चकल्पचतुष्टयस्य तात्पर्यार्थः निरूपणीयः।

5.अत्र वदन्ति कल्पोक्तं लक्षणं यथाग्रन्थं प्रतिपादयत।

## Unit 5

**लघूत्तरीयप्रश्नाः (1×12)**

1.किं ज्ञानमात्रं प्रतिबन्धकं भवति?

2.सत्प्रतिपक्षस्य लक्षणं किम्?

3.असिद्धेः कति भेदाः लक्षिताः?

4.द्वितीयलक्षणे ज्ञानस्य पदेन किं विवक्षितम्?

5.स्वरूपासिद्धेः लक्षणं किम्?

6.सव्यभिचारः कः?

7.परामर्शस्य लक्षणं किम्?

8.पक्षताऽवच्छेदकाभाववान् पक्षः कः?

9.असाधारणाऽनैकान्तिकस्य लक्षणं किम्?

10.का नाम अतिव्याप्तिः?

**टिप्पणी – (6×7)**

1.आश्रयासिद्धः

2.व्याप्यत्वासिद्धः

3.विरुद्धः

4.बाधः

5.परामर्शः

**दीर्घोत्तरीयप्रश्नाः (10×6)**

1.स्वजातीयविशिष्टान्तराऽघटितत्वं यत्पदार्थे देयमिति पङ्क्तेः व्याख्यां कुरुत।

2.विरोधीविषयिताप्रयुक्तोभयाभावघटितं लक्षणं निरूपयत।

3." तेन प्रमेयात्वादिविशिष्टे व्यभिचारादौ नातिप्रसङ्गः"- इति पङ्क्तेराशयं स्पष्टीकुरुत।

4." येन केनापि सम्बन्धेन तद्वांश्च प्रकृतो हेतुर्दुष्टः"- इतिपङ्क्तेः तात्पर्यार्थः विवेचयत।

5. सामान्यनिरुक्तिग्रन्थोक्तानां त्रयाणामपि लक्षणानां स्वरूपं प्रदर्श्य समन्वयो विधेय।